दिनाङ्क :- 27.12.2025

प्रातः - 06:55

प्रधानमन्त्रि/ त्रिदिवसीय सम्मेलन

नवदेहल्यां मुख्यसचिवानाम् पञ्चमं राष्ट्रिय सम्मेलनम् आरभत। प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य श्वः च सम्मेलनस्य अध्यक्षता करिष्यते। त्रिदिवसीय सम्मेलनस्य उद्देश्यं राष्ट्रियप्राथमिकतासु संरचितेन सुस्थिरेण च संवादेन केन्द्र-राज्यसहभागित्वं सुदृढं करणीयमस्ति। \सम्मेलने षट् विशिष्टसत्राणि सन्ति। मुख्यसचिवाः, सर्वेषां राज्यानां केन्द्रशासितप्रदेशानां च वरिष्ठाः अधिकारिणः, क्षेत्रविशेषज्ञाः अन्ये च सम्मेलनेऽस्मिन् भागं गृहणन्ति ।

प्रधानमन्त्री नरेन्द्रमोदी

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत्, यूनः राष्ट्रनिर्माणाय केन्द्रे स्थापयित्वा, नूतनाः नीतयः निर्मीयन्ते इति। नवदिल्ल्याः भारतमण्डपम् इत्यत्र वीर-बाल-दिवस-कार्यक्रमम् अभिसंबोधयन् श्रीमोदी अवदत् यत्, जेन्-जी तथा जेन्-अल्फा इत्येतौ देशम् विकसितराष्ट्रं निर्मातुं लक्ष्यम् अन्विष्यन्ति। सः अवधानं दत्तवान् यत्, अन्तरिक्षं, क्रीडा, फिन्टॅक्, विनिर्माणम् इत्यादिषु विविधक्षेत्रेषु सर्वकारेण स्वीकृतानां प्रत्येकम् उपक्रमाणां केन्द्रे युवानः एव तिष्ठन्ति। श्रीमोदी अवदत् यत् तेषां प्रतिभायाः, आत्मविश्वासस्य, नेतृत्वस्य च उपयोगाय उत्तमान् अवसरान् प्रदातुं सर्वकारः प्रतिबद्धः अस्ति इति। साहिबजादे बाबा ज़ोरावर् सिङ्घस्य, बाबा फ़तेह् सिङ्घस्य च अनुकरणीयस्य साहसस्य त्यागस्य च स्मरणम् देशे भवति। श्रीमोदी अवदत् यत्, विगतचतुर्वर्षेषु वीर-बाल-दिवसस्य माध्यमेन साहिबज़ादानाम् प्रेरणाः बलिदानं च यूनः प्रति प्रसारितम्।

राष्ट्रपतिः बाल पुरस्कारः

नवदेहल्यां वीरबालदिवसा-वसरे राष्ट्रपतिपदासीना द्रौपदी मुर्मुः उत्कृष्ट-योग्यता युतेभ्यः बालेभ्यः बालाभ्यश्च "प्रधानमन्त्री राष्ट्रियबालपुरस्कारान्" प्रदत्तवती। अस्मिन् वर्षे 18 राज्यानां केन्द्रशासितप्रदेशानाञ्च 20 बालाः पुरस्कृताः सन्ति। अस्मिन् अवसरे राष्ट्रपतिः अवदत् यत् एते पुरस्काराः प्रापकान् प्रोत्साहयिष्यन्ति, अन्यान् बालानपि प्रेरयिष्यन्ति च। राष्ट्रपतिः मुर्मुः अवदत् यत् पुरस्कारविजेतारः बालाः शौर्यक्षेत्रे, कला-संस्कृतिक्षेत्रे, पर्यावरणक्षेत्रे, नवान्वेषणक्षेत्रे, विज्ञान-तन्त्रज्ञानक्षेत्रे च असाधारणं योगदानं दत्तवन्तः इति। राष्ट्रपतिः अवदत् यत् अयं दिवसः प्रतिवर्षं साहिबज़ादा बाबा ज़ोरावर् सिङ्घ् वर्यस्य, बाबा फ़तेह् सिङ्घ् वर्यस्य च बलिदानानां स्मरणार्थं आचर्यते, ययोः अतुल्यः त्यागः सर्वान् प्रेरयति एतौ श्रीगुरुगोविन्दसिङ्घ् वर्यस्य पुत्रौ आस्ताम्। राष्ट्रपतिः इत्यपि अकथयत् यत् यदा देशस्य बालकाः देशभक्तिना उच्च आदर्शैश्च प्रेरिताः भवन्ति तदा तस्य राष्ट्रस्य मानवता निश्चिता भवति। तस्याः भाषणे राष्ट्रपतिः केचन पुरस्कारविजेतृणां बालकानां असाधारण-उपलब्धीः उद्घाटितवती। आकाशवाण्याः कतिपयैः पुरस्कृतबालैः वार्तालापम् कृतम्। कर्णाटकस्य 15 वर्षीया तरणवीरा धीनिधि देसिङ्गु उक्तवती यत्, सा राष्ट्रपतिना बालपुरस्कारं प्राप्य सम्मानिता अनुभवतीति।

राष्ट्रपतिपदासीना / गोवा

राष्ट्रपतिपदासीना द्रौपदी मुर्मुः अद्य आरभ्य गोवा-कर्नाटक-झारखंड-प्रदेशानां चतुर्दिवसीयप्रवासे भविष्यति। राष्ट्रपतिः अद्य सायङ्काले गोवा-नगरं प्रति एष्यति। श्वः राष्ट्रपतिः मुर्मूः कर्णाटकस्य कार्वार-नौकाश्रयात् जलान्तर्गामि-नौकायां समुद्रीययात्रां करिष्यति। सोमवासरे राष्ट्रपतिः झारखंड-राज्यस्य जम्शेड्पुर्-नगरे ओल्-

चिकी-लिप्याः शतवार्षिक-उत्सवे भागं ग्रहीष्यति। ओल्-चिकी-लिपिः पंचविशत्यधिक द्विसहस्रतमवर्षे रघुनाथ-मुर्मू: इत्यनेन सन्ताली-भाषायाः कृते निर्मिता।

ऋतुविज्ञान

भारतीय ऋतुविज्ञानविभागेन आगामिषु दिवसेषु उत्तरप्रदेशे नीहारस्य कृते पूर्वानुमानं रक्तवर्णीया संचेतना प्रख्यापिता। बिहार-हरियाणा-चण्डीगढ-दिल्ली-हिमाचलप्रदेश-पञ्जाब इत्येतेषु राज्येषु अपि एतादृशी स्थितिः भविष्यति।

संस्कृत-साप्ताहिकी

प्रिया: श्रोतार:, संस्कृत-जगता सम्बद्धै: विभिन्नै: क्रिया-कलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ्.एम्.गोल्ड्-प्रवाहिकात: अद्य मध्याह्ने विंशति-निमेषाधिकैक-वादनत: भविष्यति। कृपया श्रृण्वन्तु।